चतुर्दश: पाठ:। काव्यशास्त्रविनोद:। (कण्ठस्थीकरणार्थम्)

संस्कृतभाषायां सुभाषितानां महाभाण्डारं विद्यते। कानिचन सुभाषितानि चमत्कृतिपूर्णानि। तेषाम् अर्थावबोध: न सरल:। प्रहेलिका:, कूटप्रश्ना: समस्यापूर्ति: च एते प्रकारा: अस्माकं कृते मस्तिष्कखाद्यम् एव। सुभाषितानां रचना हास्यरसपूर्णा हृद्या च। अत: एव एते काव्यप्रकारा: वाचकानां मन: विनोदयन्ति।



साक्षरा विपरीताश्चेद् राक्षसा एव केवलम्।
सरसो विपरीतोऽपि सरसत्वं न मुञ्चति ।।१।।

वृक्षाग्रवासी न च पक्षिराज:
त्रिनेत्रधारी न च शूलपाणि:।
त्वग्वस्त्रधारी न च सिद्धयोगी
जलं च बिभ्रन्न घटो न मेघ: ।।२।।

तातेन कथितं पुत्र पत्रं लिख ममाज्ञया।
न तेन लिखितं पत्रं पितुराज्ञा न लङ्घिता ।।३।।

न तस्यादिर्न तस्यान्त: यो मध्ये तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति यो जानाति स पण्डित: ।।४।।

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम्।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ।।५।।

गङ्गायाश्चञ्चलतरे वारिणि प्रतिबिम्बितम्।
शोभते तारकायुक्तं शतचन्द्रं नभस्तलम् ।।६।।

यद्वक्त्रं मुहुरीक्षसे न धनिनां ब्रूषे न चाटून् मृषा
नैषां गर्ववच: शृणोषि न च तान् प्रत्याशया धावसि।
काले बालतृणानि खादसि परं निद्रासि निद्रागमे
तन्मे ब्रूहि कुरङ्ग कुत्र भवता किं नाम तप्तं तप: ।।७।।

स्पष्टीकरणम्

श्लोक: १ – साक्षरा: इति पदं विपरीतक्रमेण पठितं चेत् 'राक्षसा:' इति भवति। परं 'सरस:' इति पदम् यथानुक्रमं वा विपरीतक्रमेण पठितं चेत् 'सरस:' इत्येव भवति। अत्र कविकल्पना एवं कविकौशलं विभाति।

श्लोक: २ – स: वृक्षस्य अग्रे वसति किन्तु पक्षिराज: गरुड: न। तस्य त्रीणि नेत्राणि सन्ति किन्तु स: शूलपाणि: शङ्कर: न। स: वल्कलसदृशं वस्त्रं धारयति किन्तु स: सिद्धयोगी न। स: जलं धारयति किन्तु स: न घट: न च मेघ:। अस्य उत्तरं वर्तते नारिकेलफलम्।

श्लोक: ३ – तातेन कथितम्, "हे पुत्र, मम आज्ञया पत्रं लिख।" तेन पुत्रेण पत्रं न लिखितम्। तथापि पितु: आज्ञा न लङ्घिता। अर्थसङ्गति: न दृश्यते। यदि 'न तेन'इति एकपदं क्रियते चेत् ' नतेन' इति पदेन अर्थबोध: भवति। नतेन नाम नम्रस्वभावेन पुत्रेण पत्रं लिखितम्। अपि च पितु: आज्ञा न लङ्घिता।

श्लोकः ४ – कूटप्रश्नः अयम्। अस्य उत्तरम् – तस्य आदिः न, तस्य अन्तः न, तस्य मध्ये यः तिष्ठति (तत्) तव अपि अस्ति, मम अपि अस्ति।

श्लोकः ५ – मृगाः तृणानि खादन्ति। मत्स्याः जले विहरन्ति। साधवः सन्तोषं यच्छन्ति। परम् अस्मिन् जगति लुब्धकाः मृगान्, धीवराः मत्स्यान् तथा दुष्टाः साधून् निष्कारणमेव पीडयन्ति। अत्र यथासङ्ख्य-अलङ्कारः विद्यते।

श्लोकः ६ – शतचन्द्रं नभस्तलम्। इति काचन समस्या वर्तते। आकाशे चन्द्राणां शतं कथं शक्यते? इत्येषा समस्या। समस्यापूर्तिः – गङ्गानद्याः जलं कल्लोलयुक्तं विद्यते। यदा गगने तारकाः चन्द्रमाः च विलसन्ति तदा चन्द्रमसः शतं प्रतिबिम्बानि गङ्गानद्याः जले दृश्यन्ते। तदा कविः कल्पनां करोति, 'नभः शतचन्द्रम्' इव दृश्यते।

श्लोकः ७ – हे कुरङ्ग, यत् त्वं धनिकानां वक्त्रं मुहुः न ईक्षसे, मृषा चाटून् न ब्रूषे, एषां गर्ववचः न शृणोषि, प्रत्याशया च तान् प्रति न धावसि। काले बालतृणानि खादसि परं निद्रागमे निद्रासि। तत् मे ब्रूहि, भवता किं नाम तपः तप्तम्? एषा कुरङ्गान्योक्तिः वर्तते। सज्जनान् उद्दिश्य एषा अन्योक्तिः।

भाषाभ्यासः

श्लोकः १

१. एकवाक्येन उत्तरत।

अ) विपर्ययः कस्मिन् शब्दे दृश्यते ?
आ) विपर्ययः कस्मिन् शब्दे न दृश्यते ?
इ) मानवाः कीदृशाः भवेयुः ?
ई) मानवाः कीदृशाः न भवेयुः ?

२. कोष्टकं पूरयत।

साक्षरः मनुजः	सरसः मनुजः
---	---

(सरसत्वम्, राक्षसत्वम्, विपरीतत्वम्)

३. समानार्थकशब्दं लिखत। राक्षसः, सरसः

४. सन्धिविग्रहं कुरुत।

अ) विपरीतोऽपि =   आ) विपरीताश्चेत् =

श्लोकः २.

१. एकवाक्येन उत्तरत।

अ) वृक्षाग्रवासी कः ?   आ) कः पक्षिराजः ?
इ) कः त्रिनेत्रधारी ?   ई) कः शूलपाणिः ?
उ) कः जलं बिभर्ति ?   ऊ) कः त्वग्वस्त्रं धारयति ?

२. शब्दसमूहस्य कृते एकं संक्षेपशब्दं लिखत।

अ) यः वृक्षस्य अग्रभागे निवसति –
आ) पक्षिणां राजा –
इ) यस्य त्रीणि नेत्राणि –
ई) शूलं पाणौ यस्य सः –
उ) यः त्वग्वस्त्रं धारयति –

३. योग्यं पर्यायं चिनुत –

अ) पक्षिराजः वृक्षाग्रे (वसति/न वसति)।
आ) घटः त्रीणि नेत्राणि (धारयति/न धारयति)।
इ) शूलपाणिः जलं (बिभर्ति / न बिभर्ति)।
ई) नारिकेलं त्वग्वस्त्रं (धारयति/न धारयति)।

४. समानार्थकशब्दयुग्मं चिनुत लिखत च।

पक्षिराजः, शूलपाणिः, जलम्, मेघः, शङ्करः, वृक्षः, सिद्धयोगी, गरुडः, तरुः, तोयम्, जलदः, तपस्वी।

श्लोकः ३.

१. कः कं वदति?   'पत्रं लिख।'

२. एकवाक्येन उत्तरत।

अ) केन आज्ञा दत्ता?   आ) केन आज्ञा न लङ्घिता।
इ) पत्रं केन लिखितम् ?

३. विशेषण-विशेष्य-अन्वितिं पूरयत।

विशेषणम्	विशेष्यम्
________	पुत्रः
लिखितम्	________

४. सन्धिविग्रहं कुरुत। ममाज्ञया, पितुराज्ञा

५. श्लोकात् 'क्त' प्रत्ययान्तरूपाणि (क.भू.धा.वि.) चिनुत लिखत च।

श्लोकः ४.

१. क्रमानुसारं रचयत।

अ) त्रि-अक्षरयुक्ते शब्दे 'य' मध्ये तिष्ठति।

आ) शब्दस्य आरम्भे 'न' विद्यते।

इ) शब्दस्य अन्ते अपि 'न' विद्यते।

२. प्राप्तम् उत्तरम् – ☐ ☐ ☐

३. सन्धिं कुरुत।

अ) तस्य + आदि: (अ + आ) ________

आ) तस्य + अन्त: (अ + अ) ________

इ) तव + अपि (अ + अ) ________

ई) अपि + अस्ति (इ + अ) ________

४. श्लोकात् षष्ठ्यन्तपदानि चिनुत लिखत च।

श्लोक: ५.

१. तालिकापूर्तिं कुरुत।

	तृणवृत्ते:		वैरी	भवति
	जलवृत्ते:		वैरी	भवति
	सन्तोषवृत्ते:		वैरी	भवति

मञ्जूषा–(सज्जनस्य,धीवर:,लुब्धक:,मृगस्य,मीनस्य, पिशुन:)

२. अधोदत्तवाक्यानि श्लोकस्थ–समानार्थक–शब्दै: पुन: लिखत।

अ) हरिण: शष्पाणि भक्षयति तथापि व्याध: तस्य शत्रु: भवति।

आ) मत्स्य: जलं पिबति तथापि धीवर: तस्य रिपु: भवति।

इ) सत्पुरुष: नि:स्पृह: वर्तते तथापि दुर्जन: तस्य अरि: भवति।

श्लोक: ६.

१. एकवाक्येन उत्तरत।

अ) कस्या: नद्या: वर्णनं सुभाषिते वर्तते?

आ) शतचन्द्रं नभस्तलं कुत्र शोभते ?

२. विशेषणै: जालरेखाचित्रं पूरयत।



३. विशेषणं लिखत।

१) ______ वारिणि।

२) ______ नभस्तलम्।

४. गङ्गा इति शब्दस्य अमरपङ्क्तिं लिखत।

श्लोक: ७.

१. रिक्तस्थानं पूरयत।

अ) त्वं धनिनां ________ मुहु: न ईक्षसे।

आ) त्वं मृषा चाटून् न ________।

इ) त्वं एषां ________ न शृणोषि।

ई) त्वं तान् प्रति ________ न धावसि।

उ) त्वं काले बालतृणानि ________।

ऊ) त्वं ________ निद्रासि।

ऋ) हे कुरङ्ग, तद् ________ ब्रूहि।

ॠ) भवता किं नाम तप: ________।

२. प्रश्ननिर्माणं कुरुत।

अ) त्वं धनिनां वक्त्रं मुहु: न ईक्षसे।

आ) त्वं निद्रागमे निद्रासि।

३. समानार्थकशब्दं चिनुत लिखत च।

वदनम्, असत्यम्, शष्पम्, स्वाप:, मृग:, पश्यसि

४. श्लोकात् षष्ठ्यन्तपदे चिनुत लिखत च।

यदि –– तर्हि क्रीडा – (गणकार्यं करणीयम्।)

एकेन गणेन 'यदि' उपयुज्य एकैकं वाक्यं लेखनीयम्। अन्येन गणेन 'तर्हि' इति पदं योजयित्वा एकैकं वाक्यं लेखनीयम्। 'यदि' चिटिका: पृथक् स्थापयितव्या:। 'तर्हि' चिटिका: पृथक् स्थापयितव्या:। शिक्षकेण काऽपि एका 'यदि' चिटिका पठितव्या। अनन्तरं 'तर्हि' चिटिका पठितव्या। यद् वाक्यं तस्मात् प्राप्यते तद् अर्थपूर्णं भवेत् वा न इति न द्रष्टव्यं केवलं हसितव्यम्।

यथा – यदि अहं भिषग्वरा भविष्यामि तर्हि पशव: नर्तिष्यन्ति। ☺ ☺ ☺